# BACHELOR OF ARTS EXAMINATION, 2019

(2nd Year, 4th Semester)

**SANSKRIT (Honours)**

**Course : IX**

## [ Principles of Paninian Grammar (B) ]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

**सर्वे प्रश्नाः** सुरगिरा नागरीलिप्या च समाधेयाः —

1. अधोलिखितेषु सूत्र**द्वयं** सोदाहरणं व्याख्यायताम् — 5×2=10

(क) सह सुपा।

(ख) चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।

(ग) विशेषणं विशेष्येण बहुलम्।

(घ) पञ्चमी भयेन।

2. अधोलिखितेषु दीक्षितवचन**द्वयं** सप्रसङ्गं व्याख्यायताम् — 5×2=10

(क) बहुलग्रहणात् सुमद्रम् उन्मत्तगङ्गम् इत्यादौ सप्तम्या नित्यमम्भावः।

(ख) एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम्।

(ग) पश्चाच्छब्दस्य तु नायं समासः, 'ततः पश्चात् स्रंस्यते ध्वंस्यते' इति भाष्यप्रयोगात्।

[*Turn over*]

(घ) 'संख्यापूर्वो द्विगुश्च' इति पठित्वा चकारबलेन संज्ञाद्वय-समावेशस्य सुवचत्वात्।

3. अधोलिखितेषु **द्वयोः** ससूत्रं सिद्धिर्विधेया — 3×2=6

(क) अधिगोपम्,

(ख) कृष्णश्रितः,

(ग) अनश्वः,

(घ) कुम्भकारः।

4. अधोलिखितेषु **चतुर्णा**मुत्तरं प्रदेयम् — 1×4=4

(क) 'समस्यते' इत्यत्र कथम् अस्-धातोः आत्मनेपदम्?

(ख) उपसर्जनसंज्ञाविधायकं सूत्रं किं येन समासे पूर्वनिपातो भवति?

(ग) आकडारात् इत्येव सिद्धे सूत्रे कथं प्राग्ग्रहणम्?

(घ) सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न — इति वचनस्य किं तात्पर्यम्?

(ङ) व्यधिकरणबहुव्रीहिः कथं भवति?

(च) 'समया ग्रामम्', 'निकषा लङ्काम्' इत्यत्र समयाद्यव्ययानां समीपार्थकत्वादपि कथं न अव्ययीभावसमासः?

---